दैनिकं संस्कृतवार्तापत्रम्

# विश्वस्य वृत्तान्तः

RNI No. : GUJSAN/2011/39893

प्रधान-संपादकः - शिवराज झा 'शान्तेय'

Vishvasya Vrutantah (Sanskrit Daily Newspaper)

प्रबंध-संपादकः - मुर्तज़ा खंभातवाला

■ वर्षम् - 14 ■ अङ्कः - 89 ■ विक्रमाब्दः 2081 आषाढ़ कृष्ण पञ्चमी ■ Website : www.vishvasyavrutantam.in ■ Whatsapp No. : 8780434516 ■ दिनाङ्क : 25 - 07 - 2024, गुरुवासरः ■ पृष्ठ : 4 ■ मूल्य : रु. 5 /-

2

ग्रामीणक्षेत्रेषु आधुनिकपर्यटनसेवायै सर्वकारः कार्यरतः



3

'शिक्षा सप्ताहस्य' तृतीयदिने परिषद् विद्यालयेषु आयोजितः



4

सूरतमहानगरे संभाव्यप्लावनकाले मनपाप्रशासनं



## संक्षिप्तवार्त्ता:

### गुवाहाटी



(विश्वस्य वृत्तान्तः)

असमप्रदेशे प्लावनपीडितानां सुरक्षायै यत्र केन्द्र-सर्वकारपक्षतः वाचनिकमाश्वासनं प्रेषितं परं पीडितनागरिकाणां कृते आर्थिकसहायतायै किमपि स्पष्टीकरणं न दीयते। प्रथमवारं असमराज्याय झारखण्डसर्वकारस्य पक्षतः कोटिशः रुप्यकाणां संसाधनानि प्रेषितानि। मुख्यमन्त्री हिमन्त बिसव सरमा उक्तवान् यत् हेमन्त सोरेनस्य महनीयवदान्यचरित्रं नागरिकाणां सहायतायै यथाकालं प्रशंसनीयम्।

### गुरुग्राम



(विश्वस्य वृत्तान्तः)

हरियाणाराज्ये कांग्रेसदलेन प्रारब्धायां शोभायात्रायां रोहतकस्य सांसदः दीपेन्दर हुडा उक्तवान् यत् भाजपादलं केन्द्रीयस्वायत्तसंस्थानां, दुरुपयोगं करोति। सीबीआई, आयकरविभागः, प्रवर्त्तन निदेशालयवत् संस्थाः सर्वकारीयनीतिनां प्रत्यक्षं प्रचारयन्ति। अपरतः कांग्रेसदलस्योपरि मिथ्या दोषारोपणं च क्रियते। हरियाणाकांग्रेसविधायकः सुरेन्दर पंवारः गतसंध्यायां बन्धनं प्राप्तः। भारतस्य प्रतिकोणे विपक्षनेतृणां कृते एतादृशी अमानवीया घटना साधिता।

### विशाखापट्टनम्




(विश्वस्य वृत्तान्तः)

आन्ध्रप्रदेशस्य विशाखापट्टनं महानगरपालिकायाः वायएसआर कांग्रेसदलस्य 12 नगरसेवकाः दलपरिवर्त्तनं कृत्वा एनडीए-भाजपासाम्मुख्यस्य प्राथमिकसदस्याः संजाताः। टीडीपी-जनसेना-भाजपा इति त्रिशक्तिसाम्मुख्यस्य शासनेन राज्ये स्थिरसर्वकारस्य महती संभावना दृश्यते। महानगरस्य सांसदस्य एम.श्रीभरतस्य नेतृत्वे सप्तनगरसेवकाः टीडीपी दलमध्ये आनीताः तत्र जनसेनासंगठने अन्ये पंचसदस्याः समागताः। राज्ये नेतृणां दलपरिवर्त्तनेन वायएसआरकांग्रेसदलमध्ये चलचंचलता वर्धते।

# विशेषराज्यानामुपरि बजटस्य प्रतिकूलप्रभावः आपतेत्

**बिहारराज्यस्य सर्वाधिकः लाभः येन नीतिशकुमारस्य राष्ट्रीयराजनीतौ उपस्थितिः प्राप्नोति।। निर्मला सीतारमणस्य वक्तव्य-काले कांग्रेसदलस्य सह विरोधिसांसदाः सदने वाचनिकं विरोधं कृतवान्। महाराष्ट्रसांसदः तु उग्रप्रदर्शनाय अग्रेसराः अभवन्।**

(विश्वस्य वृत्तान्तः)

नवदेहली। चलितवित्तीयवर्षस्य व्ययाकलन-बजटपत्रस्य उपस्थापनकाले पारम्परिक-विपक्षविरोधः परं प्रथमवारं तत् प्रमाणितं यत् येषु राज्येषु भाजपा-दलस्य लोकसभानिर्वाचनीयपरिणामः उन्नतः तेषां राज्यानाम् उपरि बजटस्य महत्त्वं सर्वाधिकम्। विशेषरुपेण नरेन्द्र मोदिनः तृतीयवारस्य शासनक्षमतायां आन्ध्र-बिहारराज्ययोः समर्थनमपि प्रतिफलितम्।



बिहारराज्यस्य सर्वाधिकः लाभः येन नीतिशकुमारस्य राष्ट्रीयराजनीतौ उपस्थितिः प्राप्नोतिः। निर्मला सीतारमणस्य वक्तव्यकाले कांग्रेसदलस्य सह विरोधिसांसदाः सदने वाचनिकं विरोधं कृतवान्। महाराष्ट्रसांसदः तु उग्रप्रदर्शनाय अग्रेसराः अभवन्।

डीएमके, टीएमसी, एनसीपी, कांग्रेसदलानां सदस्याः बजटपत्रोपरि नकारात्मकीं प्रतिक्रियां प्रदाय तुष्टिकरणबजटस्य ज्वलन्तोदाहरणरुपेण अभिहिताः। बिहारराज्योपरि मोदिनः धनवर्षा केवलं निर्वाचनीयलाभस्य ऋणस्विकारणत्वेन दृश्यते। सर्वेषां राज्यानामुपरि समदृष्टिः आवश्यकी, या सीतारमणमहोदयया विस्मृता इति केचन उपहासं च कृतवन्तः।

## राज्यस्य कुष्ठाश्रमाः निर्मलावासरुपेण परिवर्त्तिताः



(विश्वस्य वृत्तान्तः)

रांची। झारखण्डस्य मुख्यमन्त्री हेमन्त सोरेन गतसंध्यायां पीएम आवासयोजनान्तर्गते कुष्ठाश्रमाणां नवीनीकरणोपरि दिशानिर्देशं दत्तवान्। रांचीमहानगरसविधे नवनिर्मितस्य मुडमाकुष्ठाश्रमस्य निरीक्षणकाले सोरेनः उक्तवान् यत् विशेषपीडितजनानां कृते राज्यस्वास्थ्यविभागः वरदानमिव सततं कार्यं करोति। विशेषवर्गस्य रुग्णपरिवारेभ्यः गृहयोजनया राज्यस्य आर्थिकसन्तुलनं स्थिरं भविष्यति। सांप्रतम् निर्मल-आवास इति नाम्ना परिसरः नामिनः क्रियते। हिताधिकारिभ्यः गृहस्य स्वामित्वं प्रदाय मुख्यमन्त्री शुभेच्छां प्रेषितवान्। राज्यसर्वकारेण संचालितं जनकल्याणं कर्म पुनः त्वरा भवति।



## राज्ये स्वायत्तसंस्था निर्वाचने अजित पवारस्य रणकौशलं भिन्नम्

(विश्वस्य वृत्तान्तः)

मुम्बई। महाराष्ट्रे भाजपासाम्मुख्य सर्वकारस्य अजीतपवारस्य दशा विचित्रा। सद्यसमापिते संसदीय निर्वाचने पवारस्य नेतृत्त्वं शङ्कास्पदम्। एनसीपीदलेन सह विश्वासघातस्य कुपरिणामः तेन प्राप्तः। अतः राज्यसर्वकारे भाजपादलमपि न सन्तुष्टम्। अत्रान्तरे अजीत पवारः उक्तवान् यत् प्रदेशे मुम्बई महानगरवत् अन्येषु मनपा - नवा - स्वायत्तनिर्वाचनेषु तस्य दलम् एकाकि एव रणाङ्गणे उपस्थाप्य भाग्यनिर्धारणं करिष्यति।



राष्ट्रीय स्वयं-सेवक संघेन भर्त्सितः पवारः पुनर्वारं शरद पवारस्य नेतृत्त्वं नेच्छति। स्वभार्यायाः बारामतीक्षेत्रात् पराजयेन अजीत पवारस्य राजनैतिकदक्षतायाः अवरोधनं सञ्जातम्। राज्ये 23 मनपासु, 226 जिलापरिषत्सु नगरपञ्चायतेषु पवारस्य नेतृत्त्वे दलीय प्रार्थीनां चयनप्रक्रिया शीघ्रमेव प्रारप्स्यते।

## राज्यकांग्रेससंगठनस्य पुनः संरचनायै प्रस्तुतिः



(विश्वस्य वृत्तान्तः)

भुवनेश्वर। ओडिशाप्रदेशकांग्रेससमितिकृते के.सी.वेणु-गोपालस्य उपस्थित्यां संगठनस्य नवनिर्माणाय घोषणा क्रियते। राज्ये संसदीयनिर्वाचने, विधानसभानिर्वाचने च कांग्रेससंगठनस्य कुत्सितप्रदर्शनेन दलगतनिर्णयः गृहीतः।

सप्ताहमध्ये नव संगठने प्रमुखनेतृणां वैधिकागमनाय सूचना। केन्द्रीयनेतृणां परामर्शोपरान्तं राज्यसंगठनस्य उन्मूलनं संजायते इति वेणुगोपालस्य कथनस्य तात्पर्यम्।



## बीजू पटनायकस्य नाम्ना पुरस्काराणां नामपरिवर्त्तनं न भविष्यति

(विश्वस्य वृत्तान्तः)

कटक। ओडिशाराज्ये क्षमतापरिवर्त्तनेन सह भाजपासर्वकारेण स्पष्टीकरणं दत्तं यत् पूर्वसर्वकारेण प्रणीताः योजनाः संशोधनीयाः परन्तु राज्यस्य वरपुत्रस्य बीजू पटनायकस्य नाम्ना पुरस्काराणां नामानि पूर्ववत् अक्षुण्णानि भविष्यन्ति।

राज्ये सर्वोत्कृष्ट-क्रीडासम्मानम्, राज्य कला-पुरस्कारादिषु नाम्नः संशोधनं नावश्यकम्। मुख्यमन्त्री मोहन माझी, गतदिवसे नवीन पटनायकेन सह साक्षात्कारसमये आश्वस्तकरं वक्तव्यं प्रदत्तवान्।

## विश्वस्य वृत्तान्तः

### अथ वैदिकपञ्चाङ्गम्

25 जुलाई 2024, गुरूवासरः



| | | | |
|---|---|---|---|
| सृष्टि संवत् | 1,96,08,53,125 | विक्रमसम्वत् | 2081 |
| सम्वत्सरः | शोभकृत | अयनः | सायनसूर्यः दक्षिणायनः |
| गोलः | उत्तरगोलः | ऋतुः | वर्षा |
| मासः | मास अमांत आषाढ़ पूर्णिमांत श्रावण | | |
| पक्षः | कृष्ण | तिथिः | पञ्चमी |
| नक्षत्रम् | पूर्वाभाद्रपद | | |
| चन्द्रराशिः | कुम्भ | योगः | शोभन, अतिगंड |
| करणम् | कौलव, तैतिल | | |

।। पञ्चाङ्गमद्यतनीयमेतत् भूयात् सर्वेभ्यः शुभम्।।

# पुराणप्रसंगेषु नागदेवानां माहात्म्यम्




(विश्वस्य वृत्तान्तः)

सुल्तानपुरम्। भारतीयधार्मिकपरम्परायां नागदेवस्य भूमिका, रुद्रावतारी शिवः, कालस्य बन्धनप्रकरणादिषु महती चर्चा बभूव। कालातीतपुरुषस्य जीवनात् दुःखस्यापसारणेन सह मोक्षत्वं च सामीप्यं भवति। कालचक्रे सर्वे बन्धनं प्राप्ताः। पुराणग्रन्थेषु शैवपरम्परायां नागदेवता कीदृशं महत्त्वं प्राप्नोति इति तदुपरि आधारवक्री चर्चां कृतवती।

कालसूचकः बासुकी-अनन्त-कालीयनागानां मध्ये भिन्नता का? जीवने कामातुराः प्राणिनः अनुरागबन्धनेन आपतिताः सन्मार्गात् विच्युतः भवन्ति। अज्ञानतया, मृत्युं प्रति भयस्य कारणमपि जायते। आधारस्थाने आदिगुरु प्रकृतिः संपूर्ण प्रकरणोपरि सूचयति स्म। एकादशरुद्रमन्थनस्य द्वितीये स्तवके शैवपरम्परायां रुद्रतत्वोपरि नागस्य महत्त्वम् च प्रतिपादितम्। डो. आलोककुमार द्विवेदी, डो. अपर्णाधीर खण्डेलवालयोः संचालकस्थाने वक्तव्यप्रसंगोपरि पूर्वापरं सूचनं प्रदत्तवत्यौ। कार्यक्रमस्य प्रारम्भे नवदेहल्याः जनैका विद्यार्थिनी वैष्णवी ओझा शिव-आराधनास्तोत्रं गीतवती।

ज्योतिषशास्त्रे समयगणनाप्रकरणे जीवलोकस्य पूर्वनिर्धारितकालस्य देवलोके, ब्रह्मलोके वा कियत् प्रतिशतं दृष्टान्तं प्रतिपादितवती। शून्यात् शिखरं यावत् मानवीय लीलया या दैहिकी यात्रा क्रियते तत्र कालः तु अनादि अन्ततः अतः अविद्यायाः परे गत्वा रुद्रस्य सान्निध्यं प्राप्तुं सर्वेषां प्रयासः जगतः कल्याणाय उद्दिष्टं स्यात्।



## देवात् महादेवः


देवात् महादेवः भवितुं सरलं न भवति। ये अमृतं पिबन्ति ते देवाः भवन्ति, ये राष्ट्रं, समाजं च प्रकृतेः रक्षणाय विषं प्रेमेण पिबन्ति, ते महादेवाः भवन्ति। विषं विना पीत्वा, विषमतां विना पचित्वा, कश्चित् अपि महान् न भवति। अद्यतन काले सर्वे अमृतस्य इच्छवः, परन्तु विषस्य न। किन्तु विषं विना स्वीकृत्य कोऽपि अमृतं न प्राप्तुं शक्नोति।

संघर्षः, दुःखम्, प्रतिकूलता, अभावः च एते सर्वे त्वां निर्मलयन्ति। समस्यायाः स्वीकृतिरेव समस्यायाः समाधानम् अस्ति। काापि समस्या तावत् एव अस्ति यावत् त्वं तस्या भीतः असि यावत् च तस्याः प्रतिकारं न करोति। मनुष्यस्य संकल्पस्य सम्मुखे महत्ती कठिनता अपि लघ्वी भवति। विषयसुखेभ्यः मुक्तिः विषमतायाः विषं पानं च एव महादेवत्वं अस्ति।



- राघव नाथ झा

# राजस्थान प्रदेशस्य 42 प्रतिशतं शासकीयशालासु प्राचार्यपदानि रिक्तानि



(विश्वस्य वृत्तान्तः)


अजमेर। राजस्थानराज्ये भाजपाशासनकाले प्राथमिक-माध्यमिकविद्यालयेषु मौलिकशिक्षायाः स्तरं खण्डितम्। प्रायतः 42 प्रतिशतं विद्यालयेषु दीर्घसमयात् प्राचार्याणां पदानि रिक्तानि। शासकीयशिक्षणप्रबन्धनं विफलम् कथ्यते।

नूतनशिक्षावर्षस्य मासद्वयादनन्तरं च रिक्तपदेषु प्राचार्याणां नियुक्तिः न क्रियते। राज्यस्य सप्तसहस्त्रेषु विद्यालयेषु उप-प्रधानशिक्षकाणां च नियुक्तिः न जायते। अनेन शालाशिक्षणं बाधाप्राप्तं भवति। राष्ट्रीयशिक्षानीतौ ये नियमाः प्रणीताः, तेषां परिपालनाय भाजपानेतृत्वं कुण्ठितं प्रतीयते।

माध्यमिकशिक्षाविभागे स्वीकृतपदेषु 17938 प्रधानाचार्याणाम्, व्याख्यातास्थानेषु 12041 पदानि, वरिष्ठपदेषु 4650 पदानि रिक्तानि सन्ति। चतुर्थवर्गस्य शिक्षणेतरकर्मीषु च 20632 पदानां पूरणाय योजना नास्तिवत् परिगण्यते।

येषु विद्यालयेषु प्राचार्याः, शिक्षकाश्च अवसरप्राप्ताः, तत्र नूतनरीत्या नियमनं नास्ति। 54 सहस्त्रं वरिष्ठशिक्षकाणां पदानि यत्र रिक्तानि तत्र नियमितं पठनपाठनं न कुशलमिति अभिभावकानां मतानि।

## स्त्रीणां लज्जा



आबाल्यादेव कर्णाकर्णिकमा कर्म ऋणुम : यह मल्लजा स्त्रीणामाभूषणं भवति । बाल्यादेव वाक्यमिदं सत्यं मन्यामळे कदापि नैव अत्र चिन्नितुं याथातथ्येन निरूपयितुं वा प्रवृतोभूमा गच्छति च काले अनुभूत यह यल्लजा समेषामेवा केवलं स्त्रीणामेत आभूषणन समाजे सम्मता चिरकालिकी तिष्ठेत् पुरुषाणाम्। कर्य चि तदर्थ लज्जा आवश्यकी प्रतिभाति।

अग समाजे ताहशी व्यवस्था परिकल्पिता यत्र स्त्रीः खेच्छ्या स्वीय वस्त्र परिदधाति तन्न तिमीचीनं परच जब पुरुषः वस्त्ररहितो अल्पवस्त्रयुक्तोऽपि साब्युः पुरुषः न कदापि अपशब्द गालिकाञ्च विहाय ब्रूते परंतदपिवरमा स्त्रीः तु यदा मुखाच्छादनपटमपि कदाचित् दूरीकरोति निष्कासयति तदा तामुपरि आन्क्षेपः पतति ।

पुरुष राजपथं शौचालय मन्यते चेन् न कापि हाँनिः । यदा पुरुषः स्वभार्ययापि वातोकरी जिहूति स्म तहा तु सन्ततिरधिका भवति स्म ।लज्जा शारीरिको अधिच सामा सामाजिकी उत वैचारिकी सर्वत्र संस्कारार्थ स्त्रीपक्ष असनेप ध्यातव्यः।

समाजे बालः कुसंस्कारसम्पन्नो जातश्चेत् तत्र मातुख कारणे संस्कृतः कार्य करणे दक्षवचेन् पितात्र कारणं इत्यपि दृश्यते ।

हे स्त्रि । स्वीयां लज्जा रक्ष ।



- डॉ. प्रिया रानी

विश्वस्य वृत्तान्तः
RNI No. : GUJSAN/2011/39893
दैनिकं संस्कृतवार्तापत्रम्

संपादक मण्डल
- श्रीमान् शिवराजझा 'शान्तेयः' - प्रधान सम्पादकः
- श्रीमान् मुर्तज़ा खंभातवाला - प्रबन्ध सम्पादकः, प्रकाशक
- श्रीमान् शिवओम मिश्रा - सह-सम्पादकः
- श्रीमान् साजिद इलेक्ट्रीकवाला- सह-सम्पादकः

मार्गदर्शकः
- प.पू. स्वामी ब्रह्ममुनिजी गुरुश्री भरतमुनीश्री - (गुजरात)
- संस्कृति फाउन्डेशन ट्रस्ट (TRUST Reg. No. F/2743/SURAT) (SOCIETY Reg. No. GUJ/2848/SURAT)

परामर्शकाः
- श्रीमान् सुधिष्ठकुमारमिश्रः - नवदेहली
- श्रीमान् गवीशः द्विवेदी - नवदेहली
- श्रीमान् डॉ. रविन्द्रकुमारपाण्डा - बड़ौदा
- श्रीमान् डॉ. नरेन्द्रपाण्डेयः - मेरठम्
- श्रीमान् डॉ. गौरवनायकः - लक्ष्मणपुरम्
- श्रीमान् योगेशभोपे - इन्दौरम्
- श्रीमान् डॉ. रत्नेश्वरमणित्रिपाठी - लक्ष्मणपुरम्
- श्रीमान् धीराजमैठाणी - उत्तराखण्डः

स्तम्भकाराः
- श्रीमान् डॉ. बलदेवानन्द सागरः - नवदेहली
- श्रीमान् डॉ. धनंजय भंजः - गुजरात (विशेष वार्ताः)
- श्रीमान् अनिल शर्मा - नवदेहली
- श्रीमान् सत्यप्रकाश त्रिपाठी (ज्योतिषाचार्य)
- श्रीमति सुजाता रमेश - बैंगलुरु (कर्णाटक)
- श्रीमान् डॉ. मधुसुदन व्यास - मोडासा (गुजरात)
- श्रीमान् साध्वी विवेका भारती - नवदिल्ली (प्रकिर्ण)
- श्रीमान् वत्सदेशराजशर्मा - हिमाचलप्रदेशः

प्रभारी
- श्रीमान् संदीप राजपूत - सूरत महानगर
- श्रीमान् विनोद मोहोड, अशोक मोहोड - द. गुजरात
- श्रीमान् अंशुगुप्तः - उत्तरप्रदेशः
- श्रीमान् राघवनाथ झा - पटना (बिहार)
- श्रीमान् कुणाल कौशिक - मोतिहारी (बिहार)
- श्रीमान् महेश तिवारी - उत्तराखण्ड
- श्रीमति रागा सुधा विजनमुरी - लंदन (युके)
- श्रीमान् अङ्कन दास - पश्चिमबङ्गाल

संपर्क कार्यालय (सूरत)

विश्वस्य वृत्तान्तः
Vishvasya Vrutantah
(Sanskrit Daily Newspaper)
दूसरा माला, IDBI एटीएम के उपर,
विमल गार्मेन्ट के सामने,
उडुपी रेस्टोरेन्ट के पास, उधना तीन रास्ता, उधना,
सूरत-394210. (गुजरात)
मो. 87804 34516, 98259 18190

# ग्रामीणक्षेत्रेषु आधुनिकपर्यटनसेवायै सर्वकारः कार्यरतः



(विश्वस्य वृत्तान्तः)

बाडमेर। उत्तरभारतस्य केषुचित् प्रदेशेषु वाइब्रैन्ट पर्यटन-ग्रामीणम् इति योजनायां राजस्था-गुजरात-पञ्जाबवत् राज्यानां समावेशनं न भवति। संप्रति एतानि राज्यानि नवाचारेण पर्यटन विकासाय मिलितप्रयासं कुर्वन्ति। यदि केन्द्रसर्वकारः एतेषां प्रदेशानां कृते अधिकानुदानस्य समर्थनं करिष्यति तदा एतेषु राज्येषु च आदर्शग्रामाणां संरचना करणीया। ग्रामीणप्रान्तेषु दुःस्थजनानां कृते नियमितरूपेण आजीविकार्जनस्य मार्गाः प्रशस्ताः भविष्यन्ति।

जैलसमेर - बाडमेर - भभर मध्ये नूतनरेलमार्गस्य उपरि संसदि चर्चा आवश्यकी। एकदा रेलमार्गस्य सञ्चालनेन वाणिज्य - शिक्षा - स्वास्थ्यक्षेत्रेषु च अनुकूलता भवेत्। जम्मू काश्मीरात् आरभ्य दक्षिणभारतस्य अन्येभ्यः राज्येभ्यः च पर्यटन वर्तुलस्य सुगम्य सञ्चालनाय वाइब्रेन्ट विलेज पर्यटन प्रसङ्गः लोकसभायाम् उत्थापनीयः।

**केन्द्रसर्वकारः एतेषां प्रदेशानां कृते अधिकानुदानस्य समर्थनं करिष्यति तदा एतेषु राज्येषु च आदर्शग्रामाणां संरचना करणीया। ग्रामीणप्रान्तेषु दुःस्थजनानां कृते नियमितरूपेण आजीविकार्जनस्य मार्गाः प्रशस्ताः भविष्यन्ति**

स्थानीय-देशीयक्रीडाभिः परिचिताः अभवन् परिषद्विद्यालयानाम् छात्राः

# 'शिक्षा सप्ताहस्य' तृतीयदिने परिषद् विद्यालयेषु आयोजितः 'क्रीडादिवसः'

स्थानीय-क्रीडाणां आयोजनेन सहैव स्वदेशीय-क्रीडाणां तेषां महत्ताविषये च दत्ता सूचना







रज्जुकूर्दनं, विष-अमृतं, खो-खो, कबड्डी चेत्यादिषु क्रीडा-क्रियासु छात्राः गृहीतवन्तः भागम्

(विश्वस्य वृत्तान्तः)

लखनऊ। योगिसर्वकारः परिषद्विद्यालयेषु अध्ययनेन सह छात्रान् क्रीडायां प्रवीणान् कर्तुं कार्यं कुर्वन् अस्ति । अस्मिन् क्रमे बुधवासरे राज्यस्य सर्वेषु परिषद्विद्यालयेषु क्रीडा-दिवसस्य आयोजनं कृतम्, यस्मिन् छात्राः स्थानीय-देशीयाः क्रीडाणां विषये ज्ञातवन्तः, तस्मिन् भागम् अपि गृहीतवन्तः ।

उल्लेखनीयं यत् भारतसर्वकारस्य शिक्षा-मन्त्रालयस्य निर्देशानुसारं परिषद् प्राथमिकं, उच्चप्राथमिकं, कस्तूरबा–गान्धी–बालिका-विद्यालये च जुलाई-मासस्य द्वाविंशतिः दिनाङ्कतः जुलाई-मासस्य अष्टाविंशतिः दिनाङ्क-पर्यन्तं "शिक्षा-सप्ताहस्य" आयोजनं क्रियते ।

अस्मिन् क्रमे जुलाई-मासस्य चतुर्विंशतिः दिनाङ्के क्रीडा-दिवसरूपेण क्रीडाक्रियाः आयोजिताः । अस्य आयोजनस्य सम्बन्धे विद्यालय-शिक्षा-महानिदेशकः कञ्चनवर्मा सर्वेभ्यः बेसिक-शिक्षा-धिकारिभ्यः, खण्डशिक्षाधिकारिभ्यः तथा डीसीटी–डीसी–बालिकानां च कृते क्रियाकलापानाम् विषये निर्देशं दत्तवान् आसीत् ।



## एतासां गतिविधिनां कृतम् आयोजनम्

शिक्षासप्ताहस्य तृतीयदिने सर्वेषु परिषद्विद्यालयेषु क्रीडादिवसस्य आयोजनं कृतम्। अस्मिन् काले स्थानीयक्रीडायाः आयोजनेन सह छात्राणां कृते स्वदेशीयक्रीडाणां महत्त्वस्य च सूचनाः प्रदत्ताः। एतदतिरिक्तं प्राचीनभारतीयक्रीडाणां इतिहासं महत्त्वं च व्याख्यातं, प्रदर्शनं च कृतम् ।

अस्मिन् अवसरे उत्सवस्य वातावरणे रज्जुकूर्दन, विष-अमृत, खो-खो, कबड्डी चेत्यादीनि क्रीडाप्रतियोगितानां आयोजनं कृतम् । अपि च छात्रान् प्रेरयितुं स्थानीयप्रेरकव्यक्तित्वमपि आमन्त्रितम्। एतेषु एसएमसी–इति अभिभावकाः, सामाजिकसंस्थाः च स्थानीयक्रीडायाः महत्त्वस्य विषये सूचनां दातुं आमन्त्रिताः आसन् । अस्मिन् काले विशेषावश्यकबालानां सहभागिता अपि सुनिश्चिता आसीत्।

**अस्मिन् अवसरे उत्सवस्य वातावरणे रज्जुकूर्दन, विष-अमृत, खो-खो, कबड्डी चेत्यादीनि क्रीडाप्रतियोगितानां आयोजनं कृतम्**



# महानगरपालिकायाः नगरसेवकाः संप्रति चिन्तामुक्ताः

विकासवादस्य प्रतीकात्मके राज्ये यत्र महात्मागान्धिनः नाम्ना मद्यपान-मद्यविक्रयणं मूलतः निषिद्धं परं गुजरात राज्ये सर्वाधिकमात्रायां मद्यस्य आयातप्रसंगः च विचारणीयः।

(विश्वस्य वृत्तान्तः)

अहमदाबादः। गुजरातराज्ये भाजपासर्वकारोपरि संगठनस्य प्रत्यक्षहस्तक्षेपः परोक्षान्तरे नियंत्रणं सर्वजनविदितम्। राज्यस्य गुरुत्वपूर्णनिर्णयप्रसंगे भाजपासंगठनस्य पदाधिकारिणां प्रभावः अस्ति।




विकासवादस्य प्रतीकात्मके राज्ये यत्र महात्मागान्धिनः नाम्ना मद्यपान-मद्यविक्रयणं मूलतः निषिद्धं परं गुजरात राज्ये सर्वाधिकमात्रायां मद्यस्य आयातप्रसंगः च विचारणीयः।

अहमदाबादमनपायाः 156 सदस्याः नगरसेवकाः वा शुक्रवासरात् प्रसन्नचिताः प्रतीयन्ते। यतो हि मनपा-संकलित-कार्योपरि तेषां नेतृत्वं नासीत्। भाजपा-दलस्य वरिष्ठनेता, राज्यस्य उपकोषाध्यक्षः, मनपासंगठनस्य सहप्रभारी धर्मेन्द्र शाहः गत-संध्यायां पदमुक्तः संजातः। तस्य नेतृत्वे मनपायाः पौराध्यक्षौः, स्थायि-सभायाः प्रमुखौः च किं कर्तव्य-विमूढाः आसन्। धर्मेन्द्र शाहस्य नेतृत्वे मनपायाः प्रमुख-परियोजनाः, प्रकल्पानि, वित्तीय विवरणं तथा नेतृणां, जनप्रतिनिधिनां भविष्यं निर्धारितं बभूव। संप्रति शाहस्य अपसारणेन 156 नगरसेवकाः आश्वस्ताः, चिन्ताहीनाः मन्यन्ते।

# शरीरात् चित्तशुद्धिकरणाय भावनाः नियंत्रिताः स्युः

(विश्वस्य वृत्तान्तः)

सूरतम्। जैनधर्मागमे चातुर्मासपर्वणि सूरतनगरस्य पालग्रामे चित्तशुद्धिः इति धार्मिकपुस्तकस्योपरि विशेषप्रबन्धनं संयोजितम्। मानवः स्वकल्याणाय, स्वसुरक्षायै वैद्यकीयपरामर्शं प्राप्नोति तथैव अध्यात्ममार्गे गन्तुकामाः सद्गुरुणां सेवां कारयन्तु। गुरुं प्रति समर्पणभावः धारणीयः इति राजसुन्दरविजयश्री निवेदितवान्। आत्मा तु सदैव क्रोध-कामादीभिः पूरितः तत्र एते रोगवत् आत्मानं नाशयन्ति। अतः सद्गुरोः आशीर्वादेन रोगमुक्तः आत्मा शरीरं पावनं कारयति।



# ग्रेटर नोएडा जनपदीये ग्रामपाठशालायाः अभूतपूर्वसफलयात्रा

(विश्वस्य वृत्तान्तः)

ग्रेटरनोईडा। उत्तरप्रदेशस्य ग्रेटर नोएडा जनपदीये अच्छेजा ग्रामे टीम ग्रामपाठशालानेतृत्त्वे पुस्तकालयस्य निर्माणेन ग्रामीणविद्यार्थिनां महान् उपकारः साधितः भवति।

अच्छेजाग्रामात् स्नातक छात्रः पीयूषः संप्रतिभारतीय प्रौद्योगिकी शास्त्रे आईआईटी जेईई प्रवेशिका परीक्षायाम् उत्तीर्णः सञ्जातः। निःशुल्क पाठशालायां निरन्तरं नियमिताध्ययनस्य



सुफलं प्राप्तः अस्ति। पाठशाला परिसरे छात्राः पारस्परिकसहयोगेन राष्ट्रस्य विकासाय परिश्रमिणः वर्तन्ते। टीम ग्रामपाठशालायाः कर्मठाः सदस्याः एतस्मिन्नावसरे सर्वेषां पुरतः नव-नव पाठशालानां स्थापनाय, सञ्चालनाय निवेदयन्ति।

पावनप्रयासः उन्नतभारतराष्ट्रस्य निर्माणाय समर्पितः भवतु इति विश्वासः। पीयूषः प्रत्यहः 16 होरापर्यन्तं ग्रामपाठशालायां अभ्यसनं कृत्वा सफलः बभूव।

# गुजरात राज्यस्य माध्यमिकशिक्षा-मण्डलेन वार्षिकपरीक्षातिथिः स्थिरीकृता



(विश्वस्य वृत्तान्तः)

गान्धीनगरम्। गुजरातप्रदेशमाध्यमिक-उच्चतर-माध्यमिक-शिक्षापरिषदा चलित-शिक्षण-सत्रस्य कृते अन्तिमा वार्षिकी परीक्षातिथि निर्धारिताः। 2025 तमवर्षस्य फरवरी-मासात् परीक्षांचालनाय दिशानिर्देशाः प्रकाशिताः।

प्रवेशिकापरीक्षाकाले स्नातक-अभियांत्रिकी-विद्यायै गुजकैटपरीक्षायाः च समयः निरुपितः। फरवरीमासस्य 27 दिनांके माध्यमिक-शालाविद्यार्थिनां तथा 28 दिनांके द्वादशवर्गस्य छात्राणां प्रथमविषयस्य लिखितपरीक्षा भविष्यति। सीबीएसई प्रणीतः परीक्षानियमः सांप्रतं राज्यशिक्षाविभागेन स्वीकृतः एव प्रतीयते।



असमराज्यस्य नलबारीमण्डलस्य कैठालकुछिग्रामस्य प्रचलितसंस्कृतिद्यार्थिनां दक्षताविकाशकार्यक्रमस्य समापनसमारोहस्य विविधानि छायाचित्राणि। कार्यक्रमे जिलाधीशमहोदया श्रीमती वर्णाली डेका (IAS)।

दैनिकं संस्कृतवार्तापत्रम्

# विश्वस्य वृत्तान्तः

■ Website : www.vishvasyavrutantam.in ■ e-mail : vishvasya.vrutantam@gmail.com





वारः गुरूवासरः

दिनाङ्क : 25 जुलाई 2024

**न हि सर्वः सर्वं जानाति**

सुधिपाठकाः! संस्कृतस्य संवर्धनाय वार्तापत्रस्य प्रकाशनमस्माकं प्रथमः प्रयासः। अत्र दोषः सम्भाव्यत इति। अतःतान् दोषान् परिष्कृत्य पठन्तु अस्मान् सूचयन्तु च। - सधन्यवाद




सूरतनगरे त्रिषु दिवसेषु आशातीतमात्रायां सततं वृष्टिपातेन अनेकेषु स्थलेषु जलप्रवेशस्य कारुण्यचित्राणि। अत्र सरथाणा आदर्शनिवासी आश्रमशालानां 95 छात्राः तथा 16 अध्यापकाः इति सर्वेषां सुरक्षितदशायां स्थलान्तरणं संजातम्। जिल्लाप्रशासनेन सर्वे सामुदायिककेन्द्रं प्रति प्रेषिताः। लटुरिया हनुमानसमीपस्थे आश्रमशालापरिसरे जलप्रवेशः चिन्ताकारणं कथ्यते।

# सूरतमहानगरे संभाव्यप्लावनकाले मनपाप्रशासनं चलचंचलम्

**जिलाधिकारी डो. सौरभ पारघी, मनपाध्यक्षा शालिनी अग्रवालः च पत्रकारपरिषदि सूचितवत्यौ यत् आवश्यकतानुसारं संक्रमितपरिवारजनानां कृते सुरक्षितस्थलेषु स्थलान्तरणाय प्रबन्धः क्रियते। पीडितेभ्यः पानीयजलम्, खाद्यपुटिकाः, मौलिकस्वास्थ्यसेवार्थे दलानि नियुक्तानि**




(विश्वस्य वृत्तान्तः)

सूरतम्। सूरतमहानगरे खाडीसंभागेषु लक्षाधिकजनानां गृहेषु जलप्रवेशस्य भीतिः वर्धते। मध्यप्रदेश-महाराष्ट्रयोः अनेकेषु जनपदेषु अविरतमेघतांडवेन उकाईजलाशये जलधारणक्षमता अधिका जायते येन कारणेन तापीनद्यां जलप्रेषणं वर्धितम्। नगरांचलस्य सचिन - कडोदरा - भेस्तान - कापोद्रादिमार्गाणामुपरि यानवाहनचालनं कठिनं भवति। जिलाधिकारी डो. सौरभ पारघी, मनपाध्यक्षा शालिनी अग्रवालः च पत्रकारपरिषदि सूचितवत्यौ यत् आवश्यकतानुसारं संक्रमितपरिवारजनानां कृते सुरक्षितस्थलेषु स्थलान्तरणाय प्रबन्धः क्रियते। पीडितेभ्यः पानीयजलम्, खाद्यपुटिकाः, मौलिकस्वास्थ्यसेवार्थे दलानि नियुक्तानि। विपर्ययनिवारणदलैः सह जिला-प्रशासनस्य नियमितं योगसूत्रं स्थापितम्। महानगरे गतदिवसे शाला-महाविद्यालयेषु विशेषावकाशकाले केषुचित् विद्यालयेषु अलुणाव्रतोपलक्ष्यं पूर्वमेव अवकाशस्य घोषणा अभूत्।

**संयमविहारात् आभासिकपटले सहस्त्रं भक्ताः उपकृताः**

# भक्तिभावेन आचरितं कर्म मोक्षत्वस्य कारणं भवेत्

**प्रबलवर्षाकाले यत्र भक्तानां समागमनं सरलं नाभूत् तत्र ओनलाईन आभासिकपटले धर्मार्थिनः वक्तव्यं श्रुत्वा प्रवचने धर्मग्रन्थानां महत्वोपरि ध्यानाकर्षणं कृतवान्। भक्तिभावनया, ग्रन्थसेवाया च ईश्वरप्राप्तिः संभाव्यते। आकाशात् जलवृष्टिकाले संयमविहारे सद्वाणी प्रवाहिता बभूव।**


(प्रेषकः अर्जुन मेड़तवालः)


सूरतम्। सूरतमहानगरस्य महावीर विद्यापीठपरिसरे नवनिर्मिते संयमविहारभवने आचार्य श्री महाश्रमणेन आध्यात्मिकोपदेशाबलिः उपस्थापिता। प्रबलवर्षाकाले यत्र भक्तानां समागमनं सरलं नाभूत् तत्र ओनलाईन आभासिकपटले धर्मार्थिनः वक्तव्यं श्रुत्वा प्रवचने धर्मग्रन्थानां महत्वोपरि ध्यानाकर्षणं कृतवान्। भक्तिभावनया, ग्रन्थसेवाया च ईश्वरप्राप्तिः संभाव्यते। आकाशात् जलवृष्टिकाले संयमविहारे सद्वाणी प्रवाहिता बभूव।

प्रबलवृष्टिजन्यबाधकत्वात् आचार्यश्री महाश्रमणः कथामण्डपोपरि आगन्तुम् असमर्थः संजातः। सांप्रतिके समये जैनपरम्परायां आगमग्रन्थस्य मूल्यं सर्वेषां कृते आराध्यम्। आगमस्वाध्याययस्य कृते केचन दिवसाः नानुकूलाः, आषाढशुक्लपूर्णिमायां ग्रन्थागमस्य पठनं निषिद्धम् परम् अन्येषु दिवसेषु एतस्य ग्रन्थस्य नियमितं पठनं, जीवने तस्य ज्ञानस्य उपयोगः आवश्यकः। भगवतीसूत्रस्य मूलाक्षरोपरि पूर्वमपि महाश्रमणः मुम्बईमहानगरे व्याख्यानम् उपस्थापितवान्।

**भगवतीसूत्रस्य 26तमे शतकविषये आचार्यस्य कथनस्य तात्पर्यं निगदितम्। सत्व-रज-तमोमयेषु गुणेषु तात्विकोपक्रमस्य सेवा ध्येया। ज्ञानपिपासवः सततं सद्ग्रन्थेभ्यः सद्गुरुभ्यः आशीर्वादान् लभन्ते। यथा दुग्धस्य सेवनं शरीर वर्धनाय परं दुग्धपात्रस्य शुद्धतां प्रति गुरुत्वम् आवश्यक।**

भगवतीसूत्रस्य 26तमे शतकविषये आचार्यस्य कथनस्य तात्पर्यं निगदितम्। सत्व-रज-तमोमयेषु गुणेषु तात्विकोपक्रमस्य सेवा ध्येया। ज्ञानपिपासवः सततं सद्ग्रन्थेभ्यः सद्गुरुभ्यः आशीर्वादान् लभन्ते। यथा दुग्धस्य सेवनं शरीरवर्धनाय परं दुग्धपात्रस्य शुद्धतां प्रति गुरुत्वम् आवश्यक। तथैव समुचितज्ञनस्याहरणकाले ज्ञानधारणाय मस्तिष्कं, विवेकंः, मनः, शरीरं च पूतमयं करणीयम्। अशुद्धे शरीरे रोगवत् ज्ञानस्य संक्रमणं नकारात्मकम्। भक्त्या, सेवाया, ज्ञानेन जीवनं सफलीकर्तुं महाश्रमणः परामर्शं दत्तवान्।

# केन्द्रीयवार्षिकव्ययाकलनपत्रे गुजरातकृते 43378 कोटिशः अनुदानम्





**तृतीयस्थाने गुजरातस्य नाम यस्य विकासवादप्रवाहः अधिकानुदानेन करणीयः। एतेन बजेट-अर्थेण हीरकोद्योगः, वस्त्रोद्योगः पुनः सक्रियं स्यात्। सी.आर.पाटीलः, अमित शाहः च चलितवर्षस्य बजटपत्रोपरि सकारात्मकप्रतिक्रियाः प्रेषितवन्तौ।**

(विश्वस्य वृत्तान्तः)

गान्धीनगरम्। केन्द्रसर्वकारेण उपस्थापिताबजटपत्रे गुजरातराज्योपरि अर्थमन्त्री निर्मला सीतारमणः कृपादृष्टिं पातयति। प्रथमवारं प्रदेशाय 43378 कोटिशः अनुदानस्य घोषणां कृत्वा सा उक्तवती यत् एनडीए साम्मुख्यस्य स्थिरत्वं नीतीशकुमारवत् नेतृणाम् उपरि निर्भरम्। बिहार - आन्ध्रप्रदेश - ओडिशावत् प्रदेशानां कृते स्वतत्रराज्यस्य मान्यता न संभवा परन्तु मोदिनः कृते बिहार - आन्ध्रयोः दलगतसमर्थनं काम्यते। तृतीयस्थाने गुजरातस्य नाम यस्य विकासवादप्रवाहः अधिकानुदानेन करणीयः। एतेन बजेट-अर्थेण हीरकोद्योगः, वस्त्रोद्योगः पुनः सक्रियं स्यात्। सी.आर.पाटीलः, अमित शाहः च चलितवर्षस्य बजटपत्रोपरि सकारात्मकप्रतिक्रियाः प्रेषितवन्तौ।

**मुख्यमन्त्री भूपेन्द्र पटेलः सांयकाले उक्तवान् यत् आत्मनिर्भरराष्ट्रस्य निर्माणदिशायाम् विकसितभारतवत् विकसितगुजरातराज्यस्य संरचना भविष्यति। एषः बजटः सर्वजनग्राही, सर्वजनकल्याणकारी च**

मुख्यमन्त्री भूपेन्द्र पटेलः सांयकाले उक्तवान् यत् आत्मनिर्भरराष्ट्रस्य निर्माणदिशायाम् विकसितभारतवत् विकसितगुजरातराज्यस्य संरचना भविष्यति। एषः बजटः सर्वजनग्राही, सर्वजनकल्याणकारी च। फरवरीमासे राज्यविधानसभायाम् आय-व्यय-आकलनपत्रस्य उल्लेखं कुर्वन् भाजपानेतारः निर्मलाप्रणीतबजटस्य भूरिप्रशसां कृतवन्तः।

**Published by** MURTAZA I. KHAMBHATWALA **on Behalf of (or owned by)** BHARTI PRAKASHAN and **Published at** 405, Shehabi Residency, Gajjar Street, Opp. SMC Health Center, Rudarpura, Surat-395001. (Gujarat)
**Editor** - SHIVRAJ HEMCHANDRA JHA. Under Section PRB Act. Responsible at all Printed Matter This Newspaper SHIVRAJ HEMCHANDRA JHA. (Subject to Jurisdiction will be Surat Only)